© 2018 IJCRT | Volume 6, Issue 1 March 2018 | ISSN: 2320-2882

# सामिधेनी मन्त्र स्वरूप विवरणम्

DSV Jagannatha Sharma
Assistant Professor
Kalpa Department, S.V. Vedic University,Tirupati

**सप्तमे सामिधेन्याद्या व्याख्यातात्यन्तविस्तरात् ॥**

[1]अथाष्टमेवशिष्टाः सामिधेन्यो व्याख्यायन्ते।

तत्र द्वितीया सामिधेनी मन्त्रकाण्ड एव पठिता- “अग्न आ याहि वीतये।

गृणानो हव्यदातये। नि होता सत्सि बर्हिषि” (तैब्रा ३.५.२) इति।

हेग्ने,हव्यदातये यजमानस्य हविर्दानाय वीतये देवानां हविर्भक्षणाय गृणानो [2]यजमानो देवानां हविर्दास्यतीति भवद्भिर्भक्षणीयमिति वदन्नायाहि।

आगत्य च होताह्वाता [3]भूत्वा बर्हिषि यज्ञे निषत्सि निषीद ॥

**तृतीयसामिधेनीपाठस्तु** –

"तं त्वा समिद्भिरङ्गिरः। घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य " (तैब्रा ३.५.२) इति।

हेङ्गिरोग्ने, तं त्वा तादृशं देवानामाहातारं त्वां समिद्भिर्धृतेन च वर्धयामः।

हे यविष्ठ्य युवतम, बृहत् ज्वालाधिक्यं यथा भवति तथा शोच दीप्यस्व ||

**[4]चतुर्थ सामिधेनीपाठस्तु** –

"स नः पृथु श्रवाय्यम्। अच्छा देव विवाससि। बृहदग्ने सुवीर्यम् " (तैब्रा ३.५.२) इति।

हेने देव, स त्वं नोस्मदर्थं पृथु विस्तीर्णं श्रवाय्यं देवैः श्रोतुं योग्यमिदं कर्माच्छा-भिमुखीकृत्य बृहत् सुवीर्यं च यथा भवति तथा विवाससि विभातं कुरु प्रकाशयेत्यर्थः।

बृहच्छब्देन ज्वालाधिक्यं विवक्षितम्।

सुवीर्यशब्देन हूयमानस्य हविषः सम्यग्दहनसामर्थ्यमुच्यते ॥

**पञ्चमसामिधेनीपाठस्तु** –

“ईडेन्यो नमस्यस्तिरः। तमासि दर्शतः।

समग्निरिध्यते वृषा (तैब्रा ३.५.२) इति। अयमग्निः सम्यगिध्यते।

कीदृशः ? ईडेन्यः स्तोतुं योग्यः, नमस्यो [5]नमस्कर्तुं योग्यः।

तमांसि तिरस्कुर्वन् दर्शतः पदार्थानां [6]दर्शयिता, वृषा कामानां वर्षयिता ॥

**षष्ठसामिधेनीपाठस्तु** –

“वृषो अग्निः समिध्यते। अश्वो न देववाहनः। तँ हविष्मन्त ईडते (तैब्रा ३.५.२) इति।

अयमग्निः सम्यगिध्यते। कीदृशः ? वृषः कामानां वर्षयिता।

अश्वो न देववाहनोश्व इव देवार्थस्य हविषो वोढा। तमिममग्निं हविष्मन्तो यजमानाः स्तुवते ॥

**सप्तमसामिधेनीपाठस्तु**–

“वृषणं त्वा वयं वृषन्। वृषाणः समिधीमहि। अग्ने दीद्यतं बृहत्" (तैब्रा ३.५.२) इति।

हे वृषन्, [7]कामाभिवर्ष काग्ने, वृषणं कामानां [8]वर्षितारं त्वां वृषाणो वयमाहुतिवृष्टिं कुर्वन्तो वयं [9]समिधीमहि सम्यक् प्रकाशयामः।

कीदृशं त्वां, बृहद्दीद्यतं प्रौढज्वालं यथा भवति तथा दीप्यमानम् ॥

**अष्टमसामिधेनीपाठस्तु** –

"अग्निं दूतं वृणीमहे। होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम् " (तैब्रा ३.५.२) इति।

इममग्निं वयं वृणीमहे प्रार्थयामहे।

कीदृशम् ? दूतं देवान् प्रति [10]प्रेषणार्ह होतारमाह्वातारं विश्ववेदसं विश्वान् सर्वान् देवान् वेतीति विश्ववेदास्तादृशम्।

अस्य यज्ञस्य संबन्धिनं सुक्रतुं शोभनकर्माणम् ॥

**नवमसामिधेनीपाठस्तु** –

"समिध्यमानो अध्वरे। अग्निः पावक ईड्यः। शोचिष्केशस्तमीमहे (तैब्रा ३.५.२) इति।

योग्निरध्वरेस्मिन् कर्मणि समिध्यमानः पावकः शुद्धिहेतुरीड्यः स्तुत्यः शोचींषि दीप्तयः केशस्थानीया यस्यासौ शोचिष्केशस्तमग्निमीमहे प्राप्नुमः ॥

**दशमसामिधेनीपाठस्तु** –

“समिद्धो अग्न आहुत। देवान् यक्षि स्वध्वर। त्वँ हि हव्यवाडसि" (तैब्रा ३.५.२) इति ॥

---

[1] अ० इ० उ० जो० ना० पा० हा . १अथ १ नास्ति।
[2] अ० इ० उ० जो० ना० पा० हा . १ यजमानो१ नास्ति।
[3] आ . भवन्।
[4] हो१ . सामिधेन्याः पाठस्तु।
[5] आ० ड . नमस्कार।
[6] आ. आदर्शयिता।
[7] आ . कामानां वर्षका ड० हो . कामानां वर्षतिर।
[8] ड० शृं० हो १ . वर्षयितारं।
[9] अ० इ० उ०जो० ना० पा० हा . सम्यगिधीमहि।
[10] ड . प्रेरणार्थय हो १ . प्रेरणार्हम्।

हे आहुताहुत्याराधिताग्ने, त्वं समिद्धः सन् देवान् यक्षि [1]यज।
हे स्वध्वर सुष्ठुनिष्पादितयाग, हि यस्मात् त्वं हव्यवाडसि तस्माद्यजेत्यन्वयः ॥

**अयंज्ञ वा एष योसामाय आ याहि वीतय इत्याह रथंतरस्यैष वर्णस्तं त्वां समिद्धरङ्गिर इत्याह वामदेव्यस्यैष वर्णो बृहदंग्ने सुवीर्यमित्याह बृहत एष वर्णो**

अयज्ञो वा इत्यादि ॥ द्वितीयाप्रभृतेः ऋचः स्तुतिः क्रियते। रथन्तरस्येति।
पूर्ववत् प्राथम्यादिना रथन्तरादिरूपत्वं तिसृणाम् ऋचाम्।
"वामदेवाड्डयड्यौ" (पा ४.२.९)। बृहदग्न इति।
बृहच्छब्दसंबन्धेन बार्हतत्वं दर्शयितुं तृतीयस्य पदस्योपादानम् ॥

**एकादशसामिधेनीपाठस्तु–**

"आजुहोत दुवस्यत। अग्निं प्रयत्यध्वरे। वृणीध्वँ हव्यवाहनम् (तैब्रा ३.५.२) इति।
हे यजमानाः,[2]इममग्निमाहुतिभिराजुहोत प्रीणयत, दुवस्यत परिचरत, प्रयति प्रयत्नेन वर्तमानेस्मिन्नध्वरे यागे [3]हव्यवाहनमग्निं वृणीध्वं प्रार्थयध्वम्।
अनया सामिधेनीनां परिसमाप्य - मानत्वादियं परिधानीया।
तत्र पुरुषभेदेनान्या परिधानीया [4]विकल्प्यते।
तथा च सूत्रकारः -"त्वं वरुण इति वसिष्ठराज-न्यानां परिधानीया।
आजुहोतेतीतरेषां गोत्राणाम् " (आपश्रौ २४.११.१५) इति ॥
विकल्पितायाः पाठस्तु- त्वं वरुण उत मित्रो अग्ने।
त्वां वर्धन्ति मतिभिर्वसिष्ठाः।
त्वे वसु सुषणनानि सन्तु। यूयं पात स्वस्तिभिः सदा नः" (तैब्रा ३.५.२) इति।
हेग्ने, त्वमनिष्टनिवारकत्वाद्वरुण इष्टप्रापकत्वात् मित्रश्च।
वसिष्ठगोत्रीया मतिभिर्मनीषाभिः स्तुतिभिः [5]"त्वां वर्धन्ति वर्धयन्ति"।
त्वे त्वयि वसु धनं सुषणनानि सुष्ठु दातव्यनि हवींषि च सन्तु तिष्ठन्तु।
यूयं च नोस्मान् स्वस्तिभिः [6]श्रेयोभिः [7]"पात सदा" रक्षत। यूयमिति बहुवचनं पूजार्थम् ॥

**अयज्ञ इति ॥**

आसु सामिधेनीषु द्वितीयादिचतुर्थ्यन्तं तृचं प्रशंसति - 'अयज्ञो वा एष योसामान आ याहि वीतय इत्याह रथंतरस्यैष वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह वामदेव्यस्यैष वर्णो बृहदभे सुवीर्यमित्याह बृहत एष वर्णो यदेतं तृचमन्वाह यज्ञमेव तत् सामन्वन्तं करोति' इति ॥
दर्शपूर्ण- मासयोः सामानि न सन्ति तद्रहितश्च न मुख्ययज्ञः।
अतोयं तृचः सामत्रयस्वरूपत्वेनात्र [8]पठ्यते।
यद्यप्येता ऋचो रथंतरादीनां योनयो न भवन्ति तथापि स्तुतित्वात् [9]तद्रूपत्वम् अविरुद्धम्।
शाखान्तरे वा तास्वृक्षु [10]गीतानि सामानि द्रष्टव्यानि।
[11]"तत् तेन" तृचपाठेन दर्शपूर्णमासयज्ञं [12]सामयुक्तं 'करोति।
'बृहदग्ने' इति तृतीयपादोपादानं बृहत्सामद्योतकस्य बृहच्छब्दस्य प्रदर्शनार्थम् ॥

**यदेतं तृचमन्वाह यज्ञमेव तत् सामन्वन्तं करोत्यग्निरमुष्मिँल्लोक आसींदादित्योंस्मिन् ताविमौ लोकाशान्ता (१) वास्तां ते देवा अंब्रुवनेतेमौ वि पर्यमेत्यम आ याहि वीतय इत्य ास्मिं ल्ले ँकेग्निमंदधुर्बृहंदग्ने सुवीर्यमित्यमुष्मिँल्लोक आंदित्यं ततो वा इमौ**

तृचमिति। तिसृणामृचां समाहारस्तृचम्। ऋक्पूः (पा ५.४.७४) इति समासान्तः।
त्रेः संप्रसारणम् उत्तरपदलोपश्च। सामन्वन्तमिति। "अनो नुट्" (पा ८.२.१६) इति नुट् ॥
अग्निरमुष्मिन्नित्यादि ||
स्वर्लोके अग्निः आसीत् पृथिव्याम् आदित्यः। ततः इमौ लोकौ अशान्तौ असुखौ आस्ताम् अभवताम्।
अथ च ते तथा पश्यन्तः देवाः परस्परम् [13]"अब्रुवन् एत आगच्छत" [14]सर्वेपि यूयम् इमौ अग्न्यादित्यो वि पर्यूहाम विपरि- वृत्तलोकौ स्थापयाम।
'अग्न आ याहि' इति, 'बर्हिषि निषीद' इति लिङ्गं नीचैरवस्थानस्य। ऋचश्च प्रथमत्वात् [15]प्रथमलोकपरिग्रहः।
तत्र तृतीयदेशस्यापि प्रथमपादादावग्निशब्दोपादानादग्नेः प्रथम- लोकावस्थानं सूच्यते।
बृहदग्न इति। [16]विवासनकारित्वमादित्यात्मन एव। अग्नेरिति। तस्योच्चैरव- स्थानलिङ्गविशेषः।

[1] आ यजसि।
[2] कण डण श्रृंण हो १ . निमाजुहोताहुतिभिः।
[3] डण श्रृं . वाहनं तमग्निं।
[4] आण्हा. विकल्पते।
[5] आ . वर्धन्ति वर्धयन्ति त्वांय अण इण उण जोण नाण पाण हो १ . त्वां वर्धयन्ति।
[6] आ . ३श्रेयोभिः ३ नास्ति।
[7] आण क. सदा पात।
[8] क. पद्यते।
[9] हा . उपपद्यते तद्रूपत्वम्।
[10] श्रृं.तानिय हो१ . एतानि य अण इण उण जोण पाण हा . भूतानि।
[11] आ. एतेन।
[12] आ. सामवन्तं।
[13] लंण हो . ३ अब्रुवन् एत आगच्छत३ नास्ति।
[14] तं३ ण लंण हो . ते सर्वेपि।
[15] लंण हो. प्रथमलोपः परि॰।
[16] तं३ ण लंण हो . विवासकारि।

ऋचः [1]तृतीयत्वात् तृतीयलोकपरिग्रहः। तत्र तृतीयदेशत्वम् ॥

**अग्निरिति ॥**

अस्मिन्नेव तृच [2]"आद्यन्तौ मन्त्र" पुनः प्रशंसति-'अग्निरमुष्मिँल्लोक आसी- दादित्योस्मिन् ताविमौ लोकावशान्तावास्तां ते देवा अब्रुवन्ने मौ वि पर्यूहामेत्यग्न आ याहि वीतय इत्यस्मिँल्लोकेग्निमदधुर्बृहदग्ने सुवीर्यमित्यमुष्मिँल्लोक आदित्यं ततो वा इमौ लोकावशाम्यतां यदेव - मन्वाद्दानयोर्लोकयोः शान्त्यै शाम्यतोस्मा इमौ लोकौ य एवं वेद' इति ॥

पुरा स्वर्गलोके अग्निः स्थितः आदित्यः तु भूलोके। [3]तदानीं लोकद्वयमशान्तं [4]क्षुब्धमासीत्।
स्वर्गे हि [5]अमृतसेविनां पाकापेक्षा नास्ति। प्रकाशाय केवलमादित्योपेक्षित एव।
भूलोकवासिनां तु पाको मुख्यं प्रयोजनम्। [6]तदुभया-सिद्धेर्लोकयोः क्षोभः।
तं क्षोभं दृष्ट्वा ते देवाः परस्परमिदमूचुः - 'इमौ अग्न्यादित्यौ वि पर्यहाम विपरिवृत्तौ स्थापयाम।
तस्मात् [7]"एत सर्वे" यूयमागच्छत इति। 'अग्न आयाहि' इत्यस्यामृचि 'बर्हिषि

**लोकावंशाम्यतां यदेवमन्वादानयोंलोक्रयोः शान्त्यै शाम्यंतोस्मा इमौ लोकौ य एवं**
**वेद् पञ्चंदश सामिधेनीरन्वांह पञ्चंदश (२) वा अर्धमासस्य रात्रंयोर्धमासशः**
**संवत्सर आंप्यते तासां त्रीणिं च शतानिं षष्टिश्वाक्षमांरांणि तावंतीः संवत्सरस्य रात्रंयो –**

अर्धमासशः [ अर्धमासेन ] अक्षरशः अक्षरेण संवत्सरमाप्नोति।
अक्षराणां रात्रीणां च समसंख्याकारेण संवत्सरावाप्तिः। पूर्ववच्छस् ॥
निषीद' इति लिङ्गाद्दचः प्राथम्याच्च प्रथमलोके स्थापनं [8]तया संपद्यते।
'बृहदग्ने सुवीर्यम्' इत्यस्यामृचि ' विवाससि ' इति विभातत्वोक्तिलिङ्गाद्दचस्तृतीयत्वाच्चास्याः [9]तृतीयलोके [10]स्थापन हेतुत्वं [11]गम्यते यद्यप्यादित्यो नास्मिन् मन्त्रे श्रुतस्तथापि [12]"तृचस्थानवर्तित्वेन तमस्तिरस्कारित्वेन" विभावत्वेन [13]आदित्यः [14]सूच्यते।
किं [15]च हंसमन्त्रावसाने "ऋतं बृहत्" (तैसं १.८.१५) इत्यादित्यमण्डलपरत्वेन श्रुतो बृहच्छब्दोत्रापि [16]श्रूयमाण आदित्यस्य प्रत्यभिज्ञापकः।
तस्मात् तेन मन्त्रेणादित्यस्थापनं सिध्यति।
[17]अनयोर्विपर्यावृत्या लोकयोः स्वस्वकार्यसिद्धेर्युक्ता शान्तिः।
तस्मादनेन क्रमेण पाठो [18]लोकद्वयशान्त्यै भवति। तद्वेदितुश्च तदुभयशान्तिर्भवति ॥

**पञ्चदशेति ॥**

संख्यां विधत्ते - 'पञ्चदश सामिधेनीरन्वाह पञ्चदश वा अर्धमासस्य रात्रयोर्ध- मासशः संवत्सर आप्यते' इति।
यद्यपि द्वादश [19]"पठितास्तथाप्येकादशैव।
एकस्याः पुरुषभेदेन [20]विकल्पितत्वात्।
तासु च प्रथमोत्तमयोस्त्रिरावृत्या पञ्चदशत्वसंपत्तिः।
अर्धमासस्य रात्रीणां पञ्चदशत्वात् तद्रूपत्वमपि संपद्यते।
एकैकस्मिन् अर्धमासे पञ्चदशस्वन्तर्भूतासु तासामर्धमासानां चतुर्विंशतिवारमावृत्त्या संवत्सर प्राप्तिश्च संपद्यते॥

**तासामिति ॥**

[21]इदानीमक्षरसंख्यां संवत्सरसंपच्या प्रशंसति- 'तासां त्रीणि च शतानि षष्टिश्चाक्षराणि तावतीः संवत्सरस्य रात्रयोक्षरश एव संवत्सरमाप्नोति' इति।
तासां [22]"पञ्चदश सामिधेनीनां" गायत्रीछन्दस्कत्वादेकैका चतुर्विंशत्यक्षरा।
तथा सति मिलित्वाक्षरसंख्या संवत्सररात्रिसंख्या

**क्षरश एव संवत्सरमांप्नोति नृमेधंश्च परंच्छेपश्च ब्रह्मवाद्यंमवंदेतामस्मिन् दारांवाद्रैग्निं**
**जंनयाव यतरो नौ ब्रह्मोयानिर्तिं नमेधोभ्यंवदत्**

[23]नृमेधश्चेत्यादि ॥ ब्रह्मवादित्वं ब्रह्मवाद्यम्।

---

[1] लं. ३ तृतीयत्वात् ३ नास्ति।
[2] आ. आद्यन्तौ हो १ . आद्यन्तमन्त्रौ।
[3] ड० श्रृं० . तदा।
[4] शृं . क्षुभितमसीत्।
[5] हो१ . अमृताशिनाम्य अ० इ० उ० जो० ना० पाहा . °सेवनात्।
[6] आ० ड . °र्लोकश।
[7] आ . एते सर्वेय ड० हो . एतदर्थम्।
[8] ड० हो १ . तथा।
[9] ड . तृतीये लोके।
[10] ड० शृं. स्थापनम्।
[11] ड. तथा संपद्यते। गम्यते।
[12] आ.उच्चैः स्थानवृत्तित्वकारित्वेन।
[13] हो१ . आदित्याः।
[14] आ . श्रूयतेय हो १ . सूच्यन्ते।
[15] ड.तु।
[16] अ०इ० उ० जो० ना० पा० हा . श्रूयमाण बृहच्छन्दः।
[17] ड० हो १ . अनया विप°।
[18] आ . लोकयोः शान्त्यै।
[19] क० शृं. ३ एकादशैव३ नास्ति।
[20] ड० शृं . विकल्पितत्वात् एकादशैव।
[21] ड० शृं० हो १ . संख्ययाऽपि ।
[22] आ . सामिधेनीन पञ्चदशसंख्यानांय क . सामि . नीनां पञ्चदशसंख्यकानां।
[23] तं३०त्रि०मै०लं० हो. नृमेधश्चेत्यादिना।

ब्रह्म वेदं वदितुमिष्टे विषये नियोक्तुं [1]सामर्थ्यं ब्रह्मवादः, तदेव ब्रह्मवाद्यम्।

स्वार्थिको यत्, " परादिश्छन्दसि (पा ६.२.१९९) इति उत्तरपदाद्युदात्तत्वम्।

यद्वा [2]ब्रह्मणो वदनसामर्थ्यं ब्रह्मवाद्यम्।

"वदः सुपि क्यप् च "(पा ३.१.१०६) इति यत्, वर्णविकाररछान्दसः, कृदुत्तरपदप्रकृतिस्वरत्वेन "यतोनावः" (पा ६.१.२१३) इत्याद्युदात्तत्वम्।

श्यन् वा व्यत्ययेन प्रवर्तते।

पूर्वं नृमेधपरुच्छेपनामानावृषी ब्रह्मवाद्ये विप्रतिपन्नावभवताम्, अहं ब्रह्मतरोहं ब्रह्मतर इति।

तौ तथा विप्रतिपन्नौ इत्थं ब्रह्मवाद्यम् अवदेतां वैमत्येन अवदताम्।

[3]"भासन (पा १०३.४७) इत्यादिना" विमतावात्मनेपदम्।

कथमित्याह - नौ आवयोर्मध्ये [4]यतरः ब्रह्मीयान् ब्रह्मतरः अस्मिन् आर्द्रे दारौ अग्निं 'जनयाव अहं वा त्वं वा।

तन्त्रेण द्वयोरभिधानं यतरो नौ ब्रह्मीयान् त्वं वाहं वा तावावामत्राग्निं [5]जनयावेति।

विशिष्टज्ञाननिमित्तत्वेन ब्रह्मशब्दस्य गुणवचनत्वात् "अजादी गुणवचनादेव" (पा ५.३.५८) इति ईयसुन्प्रत्यये [6]अलोपः।

"किंयत्तदो निर्धारणे" (पा ५.३.९२) इति यच्छन्दात् उतरच्प्रत्ययः ॥

नृमेधः अभि अवदत् | च समा इति कृत्वाक्षरद्वारा ।[7]तथैव संवत्सरप्राप्तिर्भवति।

यद्यपि वासिष्ठानां परिधानीयायास्त्रिष्टुप्त्वात् अधिकान्यक्षराणि तथापीतरगोत्रापेक्षयायमर्थवाद इत्यविरोधः ॥

**नृमेध इति ॥**

आसु सामिधेनीषु 'तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि' इत्येतं [8]मन्त्र-विशेषं प्रशंसति-' नृमेधश्च परुच्छेपश्च ब्रह्मवाद्यमवदेतामस्मिन् दाराचार्द्रेग्निं जनयाव यतरो नौ ब्रह्मीयानिति नृमेधोभ्यवदत् स धूममजनयत् परुच्छेपोभ्यवत् सोग्निमजनयदृष इत्यब्रवीद्यत् समावद्विद्व कथा त्वमग्नि-मजीजनो नाहमिति सामिधेनीनामेवाहं वर्ण वेदेत्यब्रवीद्यत् घृतवत् पदमनूच्यते स आसां वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह सामिधेनीष्वेव तज्ज्योतिर्जनयति' इति ॥

नृमेधपरुच्छेपनामानौ [9]उभावृषी परस्परं ब्रह्मवाद्यम् अवदेतां मन्त्रसामर्थ्यविषयं [10]संवादमकुरुताम्।

तत्रानयोरियं प्रतिज्ञा-आवयोरुभयोर्मध्ये'यतरः ब्रह्मीयान् ब्रह्मणि सामिधेनीमन्त्रेत्यन्तं कुशलस्तादृशं निश्चेतुं स्वस्वमनसि सामिधेनीमन्त्रमनु

**स धूममंजनयुत् परुंच्छेपोभ्यवदुत् सौग्निमंजुनयुदृषु इत्यंब्रवीुत् (३) यत् सुमावंदुिद्व**
**कुथा त्वमुग्निमजींजनोु नाहमितिं सामिधुेनीनांमुेवाहं वर्णं वुेदेत्यंब्रवीुद्यघृतवंत् पुदमं-**
**नूच्यतुे स आंसां वर्णुस्तं त्वां सुमद्भिंरङ्ग्रुर इत्यांह सामिधुेनीष्वुेव तज्ज्योतिंर्जनयतिु**

आर्द्र दारुमभिलक्ष्य अग्निं जनयितुकामो [11]"ब्रह्म वदन्" स: धूमम् एव अजनयत् नाग्निम् |

परुच्छेपः तु अग्निम् अजनयत्।

अथ तं दृष्टातिशयप्रतिपत्त्यर्थम् ऋषिशब्देन प्रेम्णामन्त्र्य नृमेधः अब्रवीत् [12]यत् यदा समावत् [13]विद्व सममेवावयोर्वेदनं सर्वत्र [14]"तदा कथा केन" हेतुना त्वम् अग्निम् अजीजनः न अहम् इति।

समादातुप् स्वार्थिकः, "था हेतौ च " (पा ५.३.२६) इति थाप्रत्ययः।

अथ परुच्छेपः अब्रवीत् - सामि-धेनीनां वर्णं स्वरूपम् अहं वेद जानामि न त्वमिति ॥

इदानीं तं वर्णं स्वयमेव परुच्छेप आह- यदिति॥ घृतेनाभिधेयेन तद्वत्पदं घृतवत् घृतशब्द एव।

यद्वा–घृतशब्दवत् पदं "तं त्वा समिद्भिः" (तैब्रा ३.५.२) इत्यस्याः द्वितीयः

स्मरन्तौ अस्मिन् आर्द्रे काष्ठे मथनेन अग्निं जनयाव इति।

तदा प्रथमं नृमेधः आर्द्र काष्ठमभिलक्ष्य मन्त्रम् 'अवदत्।

'सः तन्मन्त्रसामर्थ्यात् 'धूमम् उत्पादितवान्। 'परुच्छेपः मन्त्रं पठित्वा 'अग्निम् अजनयत्।

[15]तदानीं नृमेधः परुच्छेपं प्रति हे ऋषे, त्वमतीन्द्रियद्रष्टासि इति अभिप्रेत्य [16]संबोधितवान्।

संबोध्य चैवं पप्रच्छ— यत् यस्मात् कारणात् समावत् विद्व आवयोः [17]"सामिधेनीवेदनं समानमेव", तथा सति कथं त्वम् अग्निम् उत्पादितवान् न तु 'अहम्' इति।

तत्र परुच्छेप उत्तरमुवाच यद्यप्यावयोः सामिधेनीपाठः [18]तदर्थविज्ञानं च समानं, तथापि अहं तासाम् एव समिधेनीनां वर्णं रहस्यं तेजः 'वेद, त्वं तु न वेत्सि।

किं तत्तेज इति तदुच्यते-घृतशब्दोपेतः पादः 'अनूच्यते इति सः अयमनूच्यमानः पादः २५ सामिधेनीनां 'वर्णः सारभूतं तेजः। [19]"स पादः" कस्याचि वर्तत इति चेत् तदुच्यते - तं त्वा समि

**इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीय संहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठकेष्टमोनुवाकः ॥**

---

[1] लं० हो . असामर्थ्यम्।
[2] तं३ ० लं० हो . ब्रह्मणा।
[3] मै४ . भासनादिना।
[4] तं३ ० लं० हो . यतः।
[5] लं० हो . जनायेति।
[6] लं० हो. अलोपः ३ नास्ति।
[7] आ . तदेवम्।
[8] श्रं . मन्त्रं विशेषेण।
[9] आ . ऋत्विजौय क० ड० हो १ . ऋषी।
[10] आ०हा . वाद।
[11] लं . ब्रह्मन् वदन्य हो. ३ब्रह्म वदन् ३ नास्ति।
[12] लं० हो . ३ यत् ३ नास्ति।
[13] लं० हो. ३विद्व३ नास्ति।
[14] हो . तथा कथनेनय तं३ ० लं. तथा कथानेन।
[15] आ . तदिदानीम्।
[16] अ० उ० पा . संतोषितवान्।
[17] ड दृ सामिधेनीपाठस्तदर्थ . विज्ञानं समानं।
[18] आ . तदर्थज्ञानं।
[19] अ० इ० उ० जो० ना० पाहा . ३स पादः ३ नास्ति।